# Vaidarbhiprokta Darshanoparanta Shiva Stuti

# વૈદર્ભીપ્રોક્તા દર્શનોપરાન્ત શિવસ્તુતિઃ

## Document Information

Text title : Vaidarbhiprokta Darshanoparanta Shiva Stuti

File name : vaidarbhIproktAdarshanoparAntashivastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 25| 369-377||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 20, 2024

*sanskritdocuments.org*

# વૈદર્ભીપ્રોક્તા દર્શનોપરાન્ત શિવસ્તુતિઃ

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
વૈદર્ભી ઉવાચ
કૃતાર્થોઽસ્મિ મહાદેવ દર્શનાદધુના તત્ર ।
દર્શનાત્તવ ગૌરીશ જન્મ ધન્યમભૂન્મમ ॥ ૩૬૯॥

યદિદં પાદકમલં ભોગમોક્ષપ્રદાયકમ્ ।
દિષ્ટ્યા દૃષ્ટં મયા શમ્ભો વિષ્ણુનેત્રામ્બુજાર્ચિતમ્ ॥ ૩૭૦॥

હિરણ્યબાહુદૃષ્ટં તે રૂપં દૃષ્ટં હિરણ્મયમ્ ।
હિરણ્યવર્ણો દૃષ્ટોઽદ્ય તવ મઙ્ગલવિગ્રહઃ ॥ ૩૭૧॥

ત્વં હિરણ્યપતિર્દૃષ્ટસ્ત્વં દૃષ્ટોહ્યમ્બિકાપતિઃ ।
દૃષ્ટોઽસ્યુમાપતિઃ સાક્ષાદૃષ્ટઃ પશુપતિર્મયા ॥ ૩૭૨॥

ઋતં સત્યં પરં બ્રહ્મ પુરુષં કૃષ્ણપિઙ્ગલમ્ ।
ઊર્ધ્વરેતં વિરૂપાક્ષં દૃષ્ટ્વા ત્વાં મુદિતાઽસ્મ્યહમ્ ॥ ૩૭૩॥

પ્રત્યક્ષોઽસિ યતસ્ત્ર્યક્ષ તતોઽહં મુદિતા પ્રભો ।
મહેશ ત્વત્પ્રસાદેન ભુક્તમૈશ્વર્યમુત્કટમ્ ॥ ૩૭૪॥

મયા નજ્ઞાતમાજન્મ શારીરં દુઃખમણ્વપિ ।
સુખેનૈવ સ્થિતં શમ્ભો સર્વદા ત્વત્પ્રસાદતઃ ॥ ૩૭૫॥

કોટિશો રત્નદાનાનિ સ્વર્ણદાનાન્યપિ પ્રિયે ।
કૃતાનિ ત્વત્પ્રસાદેન પાર્વતીવલ્લભાન્વહમ્ ॥ ૩૭૬॥

ઉમેશ ભુક્તભોગાયૈ ભોગેચ્છા નૈવ મે પ્રભો ।
સત્યં સત્યં પુનઃ સત્યં દેહિ મુક્તિમતઃ પરમ્ ॥ ૩૭૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વૈદર્ભીપ્રોક્તા દર્શનોપરાન્ત શિવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૫। ૩૬૯-૩૭૭॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 25 . 369-377..

Proofread by Ruma Dewan

*Vaidarbhiprokta Darshanoparanta Shiva Stuti*

pdf was typeset on June 20, 2024

Please send corrections to *sanskrit@cheerful.com*